क।) मालवदेशजनागवल्लीभेदः। अस्या गुणाः। सुतीक्ष्णत्वं। मधुरत्वं। रुचिकारित्वं। हिमत्वं। दाहनाशित्वं। पित्तोद्रेकहरत्वं। अग्निबलसुखामोदश्रीसौभाग्यविवर्द्धनत्वं। मदकारित्वं। गुल्माध्मानविबन्धनाशित्वञ्च। इति राजनिर्घण्टः॥ ("नाम्ना याऽम्लरुहा सुतीक्ष्णमधुरा रुच्या हिमा दाहनुत् पित्तोद्रेकहरा सुदीपनकरी बल्या सुखामोदिनी। स्त्रीसौभाग्यविवर्द्धिनी मदकरी श्रेया सदा वल्लभा गुल्माध्मानविबन्धजित् च कथिता सा मालवे तु स्मृता"।)

अम्ललोणिका, स्त्री, (अम्लं रसं लाति गृह्णाति अम्ललः तम् ऊनयति हीनयति, अम्लल + ऊन + ण्वुल्, टापि अत इत्वम्।) क्षुद्रक्षुपविशेषः। आमरुल। इति भाषा। तत्पर्य्यायः। चाङ्गेरी २ चुक्रिका ३ दन्तशठा ४ अम्बष्ठा ५। इत्यमरः। अस्या गुणाः। कफवायुनाशित्वं। अग्निदीपनत्वं। ग्रहणीरोगे हितकारित्वञ्च। इति राजवल्लभः॥ वस्त्रादिलग्नलौहचिह्नकषायरागनाशकगुणोऽप्यस्ति। राजनिर्घण्टोक्तगुणपर्य्यायौ क्षुद्राम्लिकाशब्दे द्रष्टव्यौ। तत्पर्य्यायगुणाः।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका। अश्मन्तकस्तु शफरी कुशली चाम्लपत्रकः"॥
क्वचित् पुस्तके कुशलीस्थाने शकली इति च पाठः।
"चाङ्गेरी दीपनी रुच्या लघूष्णा कफवातनुत्। पित्तलाम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी"॥
इति भावप्रकाशः॥
("दीपनी चोष्णवीर्य्या च ग्राहिणी कफमारुते। प्रशस्यतेऽम्लचाङ्गेरी ग्रहण्यर्शोहिता च सा"॥
इति चरकः॥
"चाङ्गेरी कफवातघ्नी वह्निकृद् ग्रहणी हिता"।
इति वैद्यकद्रव्यगुणः॥
"चाङ्गेर्य्यम्लाग्निदीपनी"।
"ग्रहण्यर्शोऽनिलश्लेष्महितोष्णा ग्राहिणी लघुः"॥
इति च वाभटः॥
"ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता। उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी"॥
इति सुश्रुतश्च।)

अम्ललोणी, स्त्री, अम्ललोणिका। चाङ्गेरी। इत्यमरटीका॥

अम्लवती, स्त्री, (अम्लो रसो विद्यतेऽस्याः, अम्ल + मतुप् मस्य वत्वम्।) क्षुद्राम्लिका। इति राजनिर्घण्टः॥ आमरुल। इति भाषा।

अम्लवर्गः, पुं, (अम्लानां अम्लरसप्रधानानां वर्गः।) अम्लगणः। यथा। चाङ्गेरी। लकुचं। अम्लवेतसं। जम्बीरकं। वीजपूरकं। नागरङ्गं। दाड़िमं। कपित्थं। अम्लं। वीजाम्लकं। अम्बष्ठा। करमर्द्दकं। निम्बूकं। इति राजनिर्घण्टः॥ (मतान्तरे यथा,—
"आम्रमाम्रातको धात्री लकुचं च कपित्थकं। चारुः द्विविधा जम्बूः करमर्दं प्रियारकं॥ दाड़िमं पार्व्वती द्राक्षा दिधा वदरमुदकं। वीजपूरं च जम्बीरं निम्बलम्लीकाम्लवेतसं॥ रुद्राक्षं हरिमन्थश्च चाङ्गेरीत्यम्लवर्गकः"॥)
"अम्लवेतसजम्बीरलकुचाम्लचणकाम्लकाः। नागरङ्गं तिन्तिड़ी च चिञ्चाफलञ्च निम्बकं॥ चाङ्गेरी दाड़िमञ्चैव करमर्द्दन्तथैव च। एष चाम्लगणः प्रोक्तो वेतसाम्लं सदोत्तमम्"॥
इति वैद्यकरसेन्द्रसारसंग्रहः॥
"दाड़िमामलकमातुलुङ्गाम्रातक-कपित्थ-करमर्द्द-वरकोल-प्राचीनामलक-तिन्तिड़ीक-कोशाम्र-भव्य-पारावत-वेत्रफल-लकुचाम्ल-वेतस-दन्तशठ-दधि-तक्र-सुरा-शुक्त-सौवीरक-तुषोदक-धान्याम्ल-प्रभृतीनि समासेनाम्लोवर्गः"॥ इति सुश्रुतश्च॥)

अम्लवल्ली, स्त्री, (अम्लरसवती वल्ली।) त्रिपर्णिकानामकन्दविशेषः। इति राजनिर्घण्टः॥

अम्लवाटिका, स्त्री, (अम्लस्य वाटिका स्थानमिव।) नागवल्लीभेदः। अस्या गुणाः। कटुत्वं। अम्लत्वं। तिक्तत्वं। रूक्षत्वं। उष्णत्वं। मुखपाककारित्वं। विदाहपित्तरक्तप्रकोपकारित्वं। विष्टम्भदात्वं। वायुनाशित्वञ्च। इति राजनिर्घण्टः॥ (उक्तञ्च,—
"स्यादम्लवाटी कटुकाम्लतिक्ता
रूक्षा तथोष्णा मुखपाककर्त्री।
विदाहपित्तास्रविकोपिनी च
विष्टम्भदा वातनिवर्हणी च"॥)

अम्लवास्तूकं, क्ली, (अम्लरसान्वितं वास्तूकं शाकभेदः।) चुक्रं। इति राजनिर्घण्टः॥

अम्लवीजं, क्ली, (अम्लस्य वीजं कारणं।) वृक्षाम्लं। इति राजनिर्घण्टः॥

अम्लवृक्षं, क्ली, (अम्लरसो वृक्षो यस्य।) वृक्षाम्लं। इति राजनिर्घण्टः॥ तेँतुल इति भाषा।

अम्लवेतसः, पुं, स्वनामप्रसिद्धः अम्लरसवृक्षविशेषः। चुकाशाक इति ख्यात इति केचित्। अम्लकुचाइ इति ख्यात इति केचित्। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। अम्लः २ वेधी ३ रसाम्लः ४ आम्लवेतसः ५ वेतसाम्लः ६ अम्लसारः ७ शतवेधी ८ वेधकः ९ भीमः १० भेदनः ११ भेदी १२ राजाम्लः १३ अम्लभेदनः १४ अम्लाङ्कुशः १५ रक्तसारः १६ फलाम्लः १७ अम्लनायकः १८ सहस्रवेधी १९ वीराम्लः २० गुल्मकेतुः २१ वराभिधा २२ शङ्खद्रावी २३ मांसद्रावी २४। इति राजनिर्घण्टः॥ वराङ्गी २५। इति रत्नमाला॥ चुकः २६। इत्यमरः॥ तत्फलगुणाः। अत्यम्लत्वं। कषायत्वं। उष्णत्वं। वायुकफार्शःश्रमगुल्मनाशित्वं। अरुचिहारित्वञ्च। इति राजनिर्घण्टः॥ छागमांसलौहसूचीद्रवकारित्वं। चणकाम्लवत् गुणकारित्वञ्च। इति भावप्रकाशः॥ आनाहरोगनाशित्वं। तत्पक्वफलगुणाः। दोषविनाशित्वं। गुरुत्वं। धारकत्वञ्च। इति राजवल्लभः॥ तत्पर्य्यायगुणाः।
"स्यादम्लवेतसश्चुक्रः शतवेधी सहस्रजित्। अम्लवेतसमत्यम्लं भेदनं लघु दीपनं॥ हृद्रोगशूलगुल्मघ्नं पित्तलोहितदूषणं। रूक्षं विण्मूत्रदोषघ्नं प्लीहोदावर्त्तनाशनं॥ हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत्। कफवातामयध्वंसि छागमांसद्रवत्वकृत्॥ चणकाम्लगुणं ज्ञेयं लौहसूचीद्रवत्वकृत्"।
इति भावप्रकाशः॥
("अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः। गुणैस्तैरेव संयुक्तं भेदनन्त्वम्लवेतसम्"॥
इति च चरकः॥)

अम्लशाकं, क्ली, (अम्लः शाको यस्य तत्।) वृक्षाम्लं। चुक्रं। इति राजनिर्घण्टः॥ (वृक्षाम्लशब्देऽस्य विशेषो द्रष्टव्यः॥)

अम्लशाकः, पुं, (अम्लः शाको यस्य सः।) अम्लद्रव्यविशेषः। तत्पर्य्यायः। शाकाम्लं २ शुक्लाम्लं ३ अम्लचुक्रिका ४ चिञ्चाम्लं ५ अम्लचूड़ः ६ चिञ्चासारः ७। अस्य गुणाः। अतिशयाम्लत्वं। वातनाशित्वं। कफदाहहारित्वञ्च। समशर्करामिश्रितस्यास्य गुणाः। दाहपित्तकफार्त्तिनाशित्वं। इति राजनिर्घण्टः॥ (यदुक्तं,—
"अम्लशाकस्त्वतीवाम्लो वातघ्नः कफदाहनुत्। साम्येन शर्करामिश्रो दाहपित्तकफार्त्तिनुत्"॥)

अम्लसारं, क्ली, (अम्लरस एव सारः यस्य तत्।) काञ्जिकं। इति राजनिर्घण्टः॥

अम्लसारः, पुं, (अम्लरस एव सारः यस्य सः।) अम्लवेतसः। निम्बूकः। हिन्तालः। इति राजनिर्घण्टः॥

अम्लहरिद्रा, स्त्री, (अम्लरसयुक्ता हरिद्रा।) शटी। इति राजनिर्घण्टः॥

अम्लाङ्कुशः, पुं, (अम्लं अङ्कुशाकारं अग्रं यस्य।) अम्लवेतसः। इति राजनिर्घण्टः॥

अम्लातकः, पुं, (न म्लायति, म्लै + तन् स्वार्थे कन्, नञ्समासः।) अम्लानवृक्षः। इति राजनिर्घण्टः॥ अस्य गुणपर्य्यायौ राजतरुणीशब्दे ज्ञेयौ॥

अम्लानः, पुं, (म्लै + क्तः ततो नञ्समासः।) महासहावृक्षः। इत्यमरभरतौ॥ आँयला इति ख्यातः।

अम्लानः, त्रि, (म्लै + क्तः, न म्लानः नञ्समासः।) म्लानिरहितः। यथा,—
"अम्लानपङ्कजां मालां शिरस्युरसि चापरां"।
इति देवीमाहात्म्यं॥ (स्वच्छः। परिष्कृतः। निर्म्मलः। उज्ज्वलः। प्रसन्नः। विशदः। प्रत्ययः। अपर्य्युषितः। अशुल्कः।)

अम्लानिनी, स्त्री, (अम्लानानां पद्मानां समूहः। इनि।) पद्मसमूहः। पद्मिनी। इति त्रिकाण्डशेषः॥

अम्लिका, स्त्री, (अम्लैव, स्वार्थे कन्।) तिन्तिड़ी॥ इत्यमरः॥ पलाशीलता। श्वेताम्लिका। क्षुद्राम्लिका। इति राजनिर्घण्टः॥ अम्लोद्गारः। इति मेदिनी॥ [इति वाभटः।
("दीपनं भेदनं शुष्कमम्लिकाकोलयोः फलं"।
"अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः"॥
इति चरकः।
"अम्लिकायाः फलं पक्वं तद्वद्भेदि तु केवलं"॥
इति सुश्रुतः।)